ऽप्यनेन मन्त्रेणाहरेत्। अनवेक्षमाणः पृष्ठतोऽनवेक्षमाणः। अयञ्चापरोऽर्थः कुर्य्यां न कुर्य्यामिति नान्यदपेक्षमाणः, अध्यवसिताधान इत्यर्थः १६। पूर्णाहुतिरन्ते यस्य तत् पूर्णाहुत्यन्तम्, अग्न्याधेयं कर्त्तव्यम्। तच्चाग्न्याधेयमरण्याहरणादि पूर्णाहुत्यन्तं भवतीत्यर्थः। अस्य सूत्रस्य प्रयोजनं पूर्णाहुत्यन्ते आहिताग्नित्वप्राप्तिः। कथमिति चेत्। श्रुतावेवमाम्नातम्। "अग्नयः पुरुषार्थसाध्याः" इति प्रस्तुत्य "वसन्ते ब्राह्मणोऽग्निमादधीत" इत्येवमादीनि वसन्तादिकालानि ब्राह्मणादिकर्तृकाणि कर्तृगामिक्रियाफलयुक्तानि निरधिकाराणि आधानानि विधाय, "ततोऽरणी आहरेत्, सम्भारान् सम्भरेत्, अग्न्यायतनानि कुर्य्यात्, केशश्मश्रु वपेत्, ब्राह्मौदनिकमौपासनिकं निदध्यात्, तस्मिन् ब्रह्मौदनं पचेत्, समिध आदध्यात्, आयतनेषु सम्भारान्निदध्यात्, ब्राह्मौदनिकमरण्योः समारोप्य मथित्वा गार्हपत्यादीनादध्यात्, तत्र काश्चित्, समिध आदध्यात्, अग्निहोत्रं जुहुयात्, पूर्णाहुतिं जुहुयात्, तत आग्नेयमष्टाकपालं निर्वपेत् तदहरेव, तदहरादिसंवत्सरान्तानां कालानां कस्मिंश्चित् काले पवमानहवींषि निर्वपेद्द् ततश्चान्यानि हवींषि" इति १७। एवञ्च विवाहवादपुस्तके बौधायनवचने अन्यतराभावे कार्य्या प्रागग्न्याधेयेति पाठं दृष्ट्वाऽन्यथा मया व्याख्यातम् प्रागग्न्याधेयादिति पाठे तु अग्न्याधेयात् अग्न्याधानात् प्रागित्यर्थः इति बोध्यम् अयमेव पाठः समीचीनः प्रतिभाति एतच्च उद्वाहशब्दे विस्तरेण प्रपञ्चयिष्यामः। आधानप्रयोगश्च शाखिभेदेन पद्धतिविशेषे विस्तरतो ज्ञेयः। सोमाधाने विशेषश्च विस्तरभयान्नोक्तः आश्व०श्रौतसूत्रादौ ज्ञेयः। कात्या०श्रौ०सूत्रे आधाने रथकारस्याप्यधिकारमाह "रथकारस्याधाने" कात्या०१,१,९। आधान पूर्व्वकत्वादन्यत्रापि तस्याधिकारः यथोक्तं मिता० "क्षत्रियेण वैश्यायामुत्पादितोमाहिष्यः वैश्येन शूद्रायामुत्पादिता करणी तस्यां माहिष्येणोत्पादितो रथकारोनाम जात्या भवति तस्य चोपनयनादि सर्वं कार्य्यं वचनात् यथा ह शङ्खः। "क्षत्रियवैश्यानुलोमानन्तरितोत्पन्नजोरथकारस्तस्याध्ययनेज्यादानोपनयनसंस्कारक्रियाश्चाप्रतिषिद्धाः" एवमेव कर्कवृत्तौ स्थितम्। [कृत्वेत्यर्थे भावे घञ्। २आधाने पु०

**आधाय** अव्य० आ+धा-ल्यप्। १स्थापयित्वेत्यर्थे २आधानं

**आधायक** त्रि० आ+धा-ण्वुल्। आधानकारके।

**आधानिक** पु० आधानं गर्भाधानं प्रयोजनमस्य ठञ्। गर्भाधाननिमित्ते वेदविहिते गर्भपातसंस्कारभेदे।

**आधार** पु० आ+धृ-आधारे घञ्। १अधिकरणे, आश्रये, "अपामिवाधारमनुत्तरङ्गम्" कुमा० "चराचराणां भूतानां कुक्षिराधारतां गतः" कुमा० "वस्त्राधारस्नेहयोगाद्यथा दीपस्य संस्थितिः" या०स्मृतिः। २व्याकरणप्रसिद्धे औपश्लेषिकवैषयिकाभिव्यापकाख्ये ऽधिकरणकारके, शस्यसम्पादनार्थं जलरोधनार्थं ३बन्धने वृक्षसेकार्थं जलधारणार्थे ४आलबाले च। "आधारबन्धप्रमुखैरिति रघुः"। "आधारोऽधिकारणम्" पा० अधिकरणञ्च साक्षात्परम्परया वा क्रियाश्रयः अधिकरणशब्दे विवृतिः तच्च त्रिविधम् औपश्लेषिकवैषयिकाभिव्यापकभेदात्। तत्र औपश्लेषिक एकदेशसम्बन्धः यथा कटे आस्ते। वैषयिकः मोक्षे इच्छास्ति। अभिव्यापकः तिलेषु तैलमस्ति। मुग्धबोधकारस्तु "सामीप्यास्लेषविषयैर्व्याप्त्याधारश्चतुर्विध इति सामीप्यसम्बन्धेनाप्याधारतेत्याह। तच्चिन्त्यम् "गङ्गायां घोषोवसतीत्यादाविव लक्षणयैव गङ्गासमीपतीरस्योपस्थितौ न तस्य विभक्त्यर्थत्वमिति" पाणिनीयाः। ५तन्त्रोक्ते षट्चक्रमध्ये आद्यचक्रस्याधारे "आधारे लिङ्गनाभौ तदनु च हृदये तालुमूले ललाटे" आनन्दलहरी। आधारस्य भावः तल् आधारता सम्बन्धविशेषेण पदार्थविशेषस्याधेयतासम्पादके धर्म्मविशेषे तथा च आधारता आधेतायाः निरूपिका आधेयता च आधारतायाः इति तयोः परस्पर निरूप्यनिरूपकभावः आधारताया अनतिरिक्तवृत्तिधर्म्मः आधारतावच्छेदकः। एवमाधेयताया अनतिरिक्तवृत्ति धर्म्मः आधेयतावच्छेदकः यथा संयोगेन घटाधारे भूतले भूतलत्वमाधारतावच्छेदकं भूतलाधेये घटे च घटत्वमाधेयतावच्छेदकम् तयोस्तदवच्छेदकत्वात् ताभ्यामाधारताऽऽधेयता चावच्छिद्यते यथा घटत्वावच्छिन्ना घटनिष्ठाऽऽधेयता तथा भूतलत्वावच्छिन्ना भूतलनिष्ठाऽऽधारता इति नव्यनैयायिकानां रीतिः आधार+त्व। तदर्थे न०।

**आधारशक्ति** स्त्री आधारस्य शक्तिः। सर्व्वाधारशक्तिरूपायां परमेश्वरशक्तौ १मायायां २प्रकृतौ च तन्त्रोक्तायां मूलाधारस्थायां कुण्डलिन्यां ३परदेवतायाम्। ४पीठपूजनीय देव भेदे च "आधारशक्तिं प्रकृतिमित्यादि" प्रकृत्य "प्रणवादिनमोऽन्तेन पीठशक्तीः प्रपूजयेत्" तन्त्रसा० पीठशक्तिशब्देऽस्य विवृतिः।

**आधाराधेयभाव** पु० आधारश्चाधेयश्च तयोर्भावः। एकस्य यदपेक्षया आधारत्वम् अपरस्य तदपेक्षयैव यत्र